# भाषासूत्रम् - २

## नामानि-१

- **नाम-** वस्तु-स्थान-नामदर्शक: शब्द: । यथा सुधाखण्ड:, मापिका, शाला, देश:, उमेश:, ज्ञानम् इत्यादय:।
- **प्रातिपदिकम्-** शब्दस्य मूलं रूपम् । यथा देव, वन, माला, अस्मद्, युष्मद् इत्यादय: । वाक्यरचनायां मूलशब्दस्य (प्रातिपदिकस्य) उपयोग: न क्रियते। अपि तु विभक्तियुक्तशब्दानाम् उपयोग: भवति।
- **विभक्तिरूपाणि-** वाक्यार्थानुसारं शब्दानां विविधानि रूपाणि भवन्ति । तानि विभक्तिरूपाणि इति उच्यन्ते ।

१) एष: मम हस्त: ।  २) शारदाया: हस्ते वीणा शोभते ।
३) हस्तस्य भूषणं दानम् ।  ४) हस्तात् घट: पतति ।

अत्र 'हस्त' इति प्रातिपदिकस्य हस्त:, हस्ते, हस्तस्य, हस्तात् इति विभक्तिरूपाणि ।
विभक्तय: सप्त-प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी ।
सम्बोधनम् इति पृथक् विभक्ति: न । प्रथमाविभक्ते: रूपाणाम् एव परस्पर-आवाहने प्रयोग: - सम्बोधनम् ।

एवं ८ (७ विभक्तय:+ सम्बोधनम्) × ३ (वचनानि) = २४ नामपदानां विभक्तिरूपाणि भवन्ति ।

| | पुंलिङ्गम | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| अकारान्त: | देव | --- | वन |
| आकारान्त: | --- | माला | --- |
| इकारान्त: | कवि | मति | वारि |
| ईकारान्त: | --- | नदी | --- |
| उदाहरणानि | दन्त, देश, चमस, चषक, हस्त, वर्ग, स्यूत, दीप, पाद, कर्ण, यति, मुनि, ऋषि, रवि इ. | शाला, विद्या, बाला, कन्या, कथा, कला, क्रीडा, बुद्धि, भूमि, कूपी, लेखनी इ. | जल, व्यजन, पुस्तक, युतक, ज्ञान, आसन, नृत्य, दान, फल, धन, गृह, भूरि इ. |

**'अ'कारान्तं पुंलिङ्गं नाम देव (देव = द् + ए + व् + अ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| देव: | देवौ | देवा: | प्रथमा |
| देवम् | देवौ | देवान् | द्वितीया |
| देवेन | देवाभ्याम् | देवै: | तृतीया |
| देवाय | देवाभ्याम् | देवेभ्य: | चतुर्थी |
| देवात् | देवाभ्याम् | देवेभ्य: | पञ्चमी |
| देवस्य | देवयो: | देवानाम् | षष्ठी |
| देवे | देवयो: | देवेषु | सप्तमी |
| हे देव | हे देवौ | हे देवा: | सम्बोधनम् |

**'अ'कारान्तं नपुंसकलिङ्गं नाम वन (वन = व् + अ + न् + अ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| वनम् | वने | वनानि | प्रथमा |
| वनम् | वने | वनानि | द्वितीया |
| वनेन | वनाभ्याम् | वनै: | तृतीया |
| वनाय | वनाभ्याम् | वनेभ्य: | चतुर्थी |
| वनात् | वनाभ्याम् | वनेभ्य: | पञ्चमी |
| वनस्य | वनयो: | वनानाम् | षष्ठी |
| वने | वनयो: | वनेषु | सप्तमी |
| हे वन | हे वने | हे वनानि | सम्बोधनम् |

नपुंसकलिङ्गशब्दानां तृतीयात: सप्तमीपर्यन्तं पुंलिङ्गशब्दवत् रूपाणि सर्वत्र भवन्ति ।

**'आ'कारान्तं स्त्रीलिङ्गं नाम माला (माला = म् + आ + ल् + आ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| माला | माले | माला: | प्रथमा |
| मालाम् | माले | माला: | द्वितीया |
| मालया | मालाभ्याम् | मालाभि: | तृतीया |
| मालायै | मालाभ्याम् | मालाभ्य: | चतुर्थी |
| मालाया: | मालाभ्याम् | मालाभ्य: | पञ्चमी |
| मालाया: | मालयो: | मालानाम् | षष्ठी |
| मालायाम् | मालयो: | मालासु | सप्तमी |
| हे माले | हे माले | हे माला: | सम्बोधनम् |

## भाषाभ्यास:

१. **तालिकां पूरयत ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| | चन्द्रौ | | प्रथमा |
| नेत्रम् | | | द्वितीया |
| मापिकया | | | तृतीया |
| | | दन्तेभ्य: | चतुर्थी |
| | वातायनाभ्याम् | | पञ्चमी |
| गजाननस्य | | | षष्ठी |
| | उत्पीठिकयो: | | सप्तमी |
| | | हे वयस्या: | सम्बोधनम् |

२. **शब्दानाम् अर्थं विभक्त्यनुसारं माध्यमभाषया लिखत ।**

वृक्षान्, भार्यायै, कराभ्याम्, दर्पणे, कुञ्चिकया, यानात्, गीतेषु, वृक्षेषु, हस्तयो:, कर्णाभ्याम्

३. **चतुर्थपदं लिखत ।**

१. देव-देवेन :: भूप - ____ ।
२. स्यूत-स्यूतानाम् :: चमस - ____ ।
३. फल-फलानि :: पर्ण - ____ ।
४. सूर्य-सूर्यात् :: चन्द्र ____ ।
५. देव-देवेषु :: वन - ____।
६. माला-मालासु :: शाला - ____ ।

**सर्वनामानि**

१) **रमेश:** शालां गच्छति । **स:** शालां गच्छति ।
२) **रमेश:** ग्रन्थं पठति । **स:** ग्रन्थं पठति ।
३) **रमेश:** प्रश्नं पृच्छति । **स:** प्रश्नं पृच्छति ।
४) **रमेश:** गीतं गायति । **स:** गीतं गायति ।
५) **रमेश:** सुरेशं वदति । **स:** सुरेशं वदति ।

'**रमेश:**'- नाम
**स:- सर्वनाम**

नामपदस्य स्थाने प्रयुक्तं पदं 'सर्वनाम' इति उच्यते ।

| **उत्तमपुरुषवाचकं सर्वनाम** (त्रिषु लिङ्गेषु समानम्) **'अस्मद्'** | | | | **मध्यमपुरुषवाचकं सर्वनाम** (त्रिषु लिङ्गेषु समानम्) **'युष्मद्'** | | |
|---|---|---|---|---|---|---|
| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्ति:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| अहम् | आवाम् | वयम् | **प्रथमा** | त्वम् | युवाम् | यूयम् |
| माम्/मा | आवाम्/नौ | अस्मान्/न: | **द्वितीया** | त्वाम्/त्वा | युवाम्/वाम् | युष्मान्/व: |
| मया | आवाभ्याम् | अस्माभि: | **तृतीया** | त्वया | युवाभ्याम् | युष्माभि: |
| मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/न: | **चतुर्थी** | तुभ्यम्/ते | युवाभ्याम्/वाम् | युष्मभ्यम्/व: |
| मत् | आवाभ्याम् | अस्मत् | **पञ्चमी** | त्वत् | युवाभ्याम् | युष्मत् |
| मम/मे | आवयो:/नौ | अस्माकम्/न: | **षष्ठी** | तव/ते | युवयो:/वाम् | युष्माकम्/व: |
| मयि | आवयो: | अस्मासु | **सप्तमी** | त्वयि | युवयो: | युष्मासु |

**प्रथमपुरुषवाचकानि सर्वनामानि - तद्**

| **तद् पुंलिङ्गम्** | | | **तद् स्त्रीलिङ्गम्** | | | **तद् नपुंसकलिङ्गम्** | | | |
|---|---|---|---|---|---|---|---|---|---|
| **ए. व.** | **द्वि.व.** | **ब. व.** | **ए. व.** | **द्वि.व.** | **ब. व.** | **ए.व.** | **द्वि.व.** | **ब. व** | **विभक्ति:** |
| स: | तौ | ते | सा | ते | ता: | तत्-तद् | ते | तानि | **प्रथमा** |
| तम् | तौ | तान् | ताम् | ते | ता: | तत्-तद् | ते | तानि | **द्वितीया** |
| तेन | ताभ्याम् | तै: | तया | ताभ्याम् | ताभि: | तेन | ताभ्याम् | तै: | **तृतीया** |
| तस्मै | ताभ्याम् | तेभ्य: | तस्यै | ताभ्याम् | ताभ्य: | तस्मै | ताभ्याम् | तेभ्य: | **चतुर्थी** |
| तस्मात् | ताभ्याम् | तेभ्य: | तस्या: | ताभ्याम् | ताभ्य: | तस्मात् | ताभ्याम् | तेभ्य: | **पञ्चमी** |
| तस्य | तयो: | तेषाम् | तस्या: | तयो: | तासाम् | तस्य | तयो: | तेषाम् | **षष्ठी** |
| तस्मिन् | तयो: | तेषु | तस्याम् | तयो: | तासु | तस्मिन् | तयो: | तेषु | **सप्तमी** |

अवबोधत - सर्वनामपदानां सम्बोधनविभक्ति: न भवति ।

'तद्' सर्वनामवत् एव 'यद्', 'एतद्' तथा 'किम्' एतेषां रूपाणि भवन्ति ।

| | पुंलिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| | ए.व. | द्विव. | ब.व. | ए. व. | द्वि.व. | ब. व. | ए. व. | द्विव. | ब. व. |
| यद् | यः | यौ | ये | या | ये | याः | यद् | ये | यानि |
| एतद् | एषः | एतौ | एते | एषा | एते | एताः | एतत्/एतद् | एते | एतानि |
| किम् | कः | कौ | के | का | के | काः | किम् | के | कानि |

## भाषाभ्यासः

**१. मेलनं कुरुत ।**

| **विभक्तिः** | **रूपम्** |
|---|---|
| प्रथमा | यासाम् |
| द्वितीया | काभिः |
| तृतीया | एतस्मै |
| चतुर्थी | माम् |
| पञ्चमी | मत् |
| षष्ठी | त्वयि |
| सप्तमी | तानि |

**२. योग्यरूपं लिखत ।**

१. _____ (एतद्) मम हस्तौ ।
२. अरे बालक, किं _____ (युष्मद्) नाम ।
३. _____(यद्) हस्ते शस्त्रं _____(तद्) सैनिकः ।
४. _____(अस्मद्) सर्वे भारतीयाः ।
५. _____(तद्) नगरे प्राणिसङ्ग्रहालयः वर्तते ।

### पठत-बोधत



| | |
|---|---|
| छात्रः अस्ति । | छात्राः सन्ति । |
| दन्तः अस्ति । | दन्ताः सन्ति । |
| केशः अस्ति | केशाः सन्ति । |
| चरणः अस्ति । | चरणौ स्तः । |
| हस्तः अस्ति । | हस्तौ स्तः । |
| अहं छात्रः अस्मि । | वयं छात्राः स्मः । |
| त्वं बालकः असि । | यूयं बालकाः स्थ । |

बालकः पठनं करोति ।
बालकाः पठनं कुर्वन्ति ।
कुम्भकारः कुम्भान् करोति ।
कुम्भकाराः कुम्भान् कुर्वन्ति ।
लवकुशौ गायनं कुरुतः ।
पाण्डवाः दानं कुर्वन्ति ।

**अस् (प.प.) लट्लकारः**

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | अस्ति | स्तः | सन्ति |
| म. पु. | असि | स्थः | स्थ |
| उ. पु. | अस्मि | स्वः | स्मः |

**कृ (प. प.) लट्लकारः**

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | करोति | कुरुतः | कुर्वन्ति |
| म. पु. | करोषि | कुरुथः | कुरुथ |
| उ. पु. | करोमि | कुर्वः | कुर्मः |

**'अस्' तथा 'कृ' एतयोः उपयोगं कृत्वा पञ्चदशवाक्यानि वदत ।**